अन्याशौचमध्येऽपि जातकर्म्म षष्ठीपूजे कर्त्तव्ये । पुत्रजन्मनिमित्तकं वृद्धिश्राद्धं नाड़ीच्छेदात् पूर्व्वम् अशौचान्ते वा कर्त्तव्यम्। पुत्रकन्याजनने स्त्रीणां स्वजात्युक्तदशाहादितः परं लौकिककर्म्माधिकारः । पुत्रजनने तु वैदिककर्म्माधिकारो विंशतिरात्रोत्तरं स्नानात्, कन्याजनने तु मासोत्तरं स्नानात् ब्राह्मण्याः । शूद्रायास्तूभयत्रैव मासोत्तरं स्नानात् शुद्धिः । एतत् सर्व्वं पुत्रकन्ययोर्विद्यमानत्वे बोध्यम् । जननाशौचकालोत्तरं षण्मासाभ्यन्तरमजातदन्तमरणे पित्रोरेकाहः । एवं निर्गुणसोदरस्य, सपिण्डानान्तु सद्यः । षण्मासाभ्यन्तरेऽपि जातदन्तस्य मरणे पित्रोस्त्र्यहः सपिण्डानामेकाहः षण्मासोपरि द्विवर्षपर्य्यन्तं पित्रोस्त्र्यहः । सपिण्डानामकृतचूड़े मृते एकाहः कृतचूड़े त्र्यहः । द्विवर्षोपरि सर्व्वेषामनुपनीतस्य मरणे मासत्रयाधिकषड्वर्षं यावत् त्र्यहः । पञ्चवर्षोपनीतस्य तदानीमपि दशाहः । मासत्रयाधिकषड्वर्षोपरि सर्व्वेषां दशाहः । शूद्राणां तु षण्मासोपरि द्विवर्षाभ्यन्तरे पञ्चाहः। अत्रापि कृतचूड़स्य द्वादशाहः । द्विवर्षोपरि षड्वर्षाभ्यन्तरे द्वादशाहः । अत्रापि दैवात् कृतोद्वाहेऽपि मासः । षड्वर्षोपरि मासः । अत्र मासवर्षपरिगणना सावनेन "सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा। मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिता" इति सूर्य्यसिद्धान्तात् । अथासपिण्डाशौचं गुरु मातामहमरणे त्रिरात्रं भगिनीमातुलानीमातुलपितृष्वसृमातृष्वसृगुर्व्वङ्गनामातामहीमरणे पक्षिणी । श्वश्रूश्वशुरयोर्भिन्नग्रामस्थयोर्मरणेऽहोरात्रम् । आचार्य्यपत्नीपुत्रयोरुपाध्यायस्य मातृवैमात्रेयस्य श्यालकस्य सहाध्यायिनः शिष्यस्य च मरणेऽहोरात्रं मातृष्वस्रीयपितृष्वस्रीयमातुलपुत्रभागिनेयमरणे पक्षिणी । पितामहभगिनीपुत्रपितामहीभ्रातृतद्भगिनीपुत्ररूपपितृबान्धवत्रयमरणे पक्षिणी । मातामहभगिनीपुत्रमातामहीभगिनीपुत्रमातामहीभ्रातृपुत्ररूपमातृबान्धवत्रयमरणेऽहोरात्रम् । एकग्रामवासिगोत्रजमरणेऽहोरात्रम् औरसव्यतिरिक्तपुत्रजननमरणयोः परपूर्व्वभार्य्याप्रसवमरणयोश्च त्रिरात्रम् । सजातीयपुरुषान्तरसंगृहीतस्वभार्य्यामरणे त्रिरात्रम् । मातृष्वसृपितृष्वसृमातुलभगिनीपुत्राणां गृहस्थितानामाचार्य्यस्य च मरणे त्रिरात्रम् । श्वश्रूश्वशुरयोः सन्निधिमरणे त्रिरात्रं श्वश्रूश्वशुरयोरेकग्रामस्थितयोर्मरणे पक्षिणी । प्रथममन्येनोढा तेनैव जनितपुत्रा पुत्रसहितैवान्यमाश्रिता पश्चात्तेनापि जनितपुत्रा तयोः पुत्रयोर्यथासम्भवं प्रसवमरणयोर्द्वितीयपुत्त्रपितुश्च त्रिरात्रं तत्सपिण्डानामेकरात्रं तथाविधपुत्त्रयोः परस्परप्रसवमरणयोर्मातृजात्युक्तमशौचम् । दौहित्रमरणे पक्षिणी । पितृमातृमरणे ऊढ़ानां कन्यानां त्रिरात्रम् । यदि मातृष्वसृप्रभृतीनां दहनवहने करोति तदा त्रिरात्रम् । मातामहादीनां त्रिरात्राभ्यन्तरमरणश्रवणे तच्छेषेण शुद्धिः । तत्तत्कालोत्तरश्रवणे तु नाशौचं किन्त्वाचारात् स्नानम् । अथ मृत्युविशेषाशौचम् । शास्त्राननुमतबुद्धिपूर्व्वकात्मघातिनो नाशौचादि । शास्त्रानुमत्याऽनशनादिमृतस्य प्रमादादनशनाशनिवह्निजलोच्चदेशप्रपतनसंग्रामशृङ्गिदंष्ट्रिनखिव्यालविषचाण्डालचौरहतस्य त्रिरात्रम् । शृङ्ग्यादिभिः स्त्रिया च क्रीड़ां कुर्व्वतः प्रमादहतस्यापि नाशौचादि । नागविप्रियकारित्वेन उद्धतस्य मरणोद्देशेन प्रवृत्तस्य विद्युद्धतस्य च चौर्य्यादिदोषेण राज्ञा हतस्य च कलहं कृत्वा चाण्डालाद्यैरसमानैर्हतस्य च व्याधिजनकौषधस्य विषस्य वह्नेश्च दातुर्मरणे पाषण्डप्रायाश्रितस्य च नित्यं परापकारिणश्च क्रोधात् स्वयं प्रायोविषवह्निशस्त्रोद्बन्धनजलगिरिवृक्षप्रपातैर्मृतस्य चर्म्ममांसास्थ्यादिमयपात्रनिर्म्मातुर्विप्रादेश्च मनुष्यवधस्यानाधिकारिणश्च कण्ठदेशोत्पन्नभगरोगस्य पुंस्कर्म्माशक्तनपुंसकस्य च ब्राह्मणविषयापराधकरणान्निहतस्य च बुद्धिपूर्व्वकब्राह्मणहतस्य च महापातकिनश्च एवंविधपतितानां न दाहादिकं कार्य्यम् । तत्कृत्वा तप्तकृच्छ्रद्वयं कुर्य्यात् । म्लेच्छतस्करादिभिर्युद्धे स्वाम्यर्थं हतस्य विप्रादेर्दाहादिकमस्त्येव । अकृतप्रायश्चित्तस्य गलत्कुष्ठिनो न दाहादिकं कार्य्यं शस्त्रेणाभिमुखहतस्य सद्यः शौचं दाहादि च । गवार्थे ब्राह्मणार्थे वा दण्डेन युद्धहतस्याहोरात्रमशौचम् । नृपतिरहितयुद्धे लगुड़ादिहतस्य पराङ्मुखहतस्य त्रिरात्रम्। गोविप्रपालनेऽभिमुखपराङ्मुखत्वाभ्यां हतस्य सद्यस्त्रिरात्रे । शस्त्रघातेतरक्षते सप्ताहादूर्द्ध्वं मरणे सम्पूर्णं, शस्त्रघाते त्र्यहादूर्द्ध्वं च प्रकृताशौचम् । शुद्धि०त० । एतत्प्रमाणानि तत्रैव तु सर्व्वेयानि । "मातृवद्वर्णसङ्कराः" इत्युक्ते मूर्द्धावसिक्ताम्बष्ठादीनामनुलोमजानां मातृवर्णानुसारेणाशौचम् प्रतिलोमजानां तु "शूद्रेण तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः" इत्युक्तेः शूद्रतुल्याशौचमिति रघुनन्दनादयः । आचारस्तु मातृतुल्यतया दृश्यते अतएव चण्डालादीनां दशाहाशौचाचारः । देवतामन्त्रादिदातुर्मरणे त्रिरात्रम् । वेदाङ्गादिशास्त्राध्यापकस्य तथाविधशिष्यस्य च मरणे एकाहः 'गृहीतो देवता मन्त्रः साविवीग्रहणं कृतम्। यस्मात्तस्य त्रिरात्रं स्यात् ब्रह्मविद्या गृहीयतः" इति "उपनीयाध्यापको यस्तस्मिन्नपि